# শ্রীহযগ্রীবসহস্রনামস্তোত্রম্

{॥ শ্রীহযগ্রীবসহস্রনামস্তোত্রম্ ॥}

॥ শ্রীঃ ॥

শুক্লাম্বরধরং বিষ্ণুং শশিবর্ণং চতুর্ভুজং

প্রসন্নবদনং ধ্যাযেৎসর্ববিঘ্নোপশান্তযে ।

যস্য দ্বিরদবক্ত্রাদ্যাঃ পারিষদ্যাঃ পরশ্শতং

বিঘ্নং নিঘ্নন্তি সততং বিষ্বক্সেনং তমাশ্রযে ॥

শ্রীকাশ্যপঃ -

তাত মে শ্রীহযগ্রীবনাম্নাং সাহস্রমুত্তমম্ ।

অধ্যেতুং জাযতে কাঙ্ক্ষা তৎপ্রসীদ মযি প্রভো ॥ ১॥

ইতিপৃষ্টস্ততোবাচ ব্রহ্মা লোক পিতামহঃ ।

শ্রেযসামপি চ শ্রেযঃ কাশ্যপেহ বিশাম্পতে ॥ ২॥

অমত্যা বিহিতং পাপং মূলতো হি বিনশ্যতি ।

রহস্যানাং রহস্যং চ পাবনানাং চ পাবনম্ ॥ ৩॥

প্রাযশ্চিত্তে কৃতে তস্য কর্তান নিরযী ভবেত্ ।

কামতস্তু কৃতে পাপে প্রাযশ্চিত্তশতেন চ ॥ ৪॥

তন্ন নশ্যতি তৎকর্তা ব্যবহার্যস্তু জায়তে ।
এবং দুরপনোদানাং বুদ্ধিপূর্বমহাংহসাম্ ॥ ৫॥

আবর্জনকরাণামপ্যন্তে নিষ্কৃতিরীরিতা ।
প্রণম্য মানবতয়া মন্ত্ররত্নানুকীর্তনম্ ॥ ৬॥

হংসনামসহস্রস্যপঠনং শিরসান্বহম্ ।
প্রণম্য ভগবদ্ভক্তপাদোদক নিষেবণম্ ॥ ৭॥

তদেতত্ত্রিতযং সর্বপাপসঙ্ঘাতনাশনম্ ।
ইতীদং পরমং গুহ্যং হংসো হযশিরাহরিঃ ॥ ৮॥

বেদোপদেশসমযে মাং নিবোধ্যোপদিষ্টবান ।
অনেন মন্ত্ররত্নেন মহাশ্বশিরসো হরেঃ ॥ ৯॥

সহস্রনামভিস্তুল্যা নিষ্কৃতির্নেতরাংহসাম্ ।
অনন্যভগবদ্ভক্তপাদোদকনিষেবণম্ ॥ ১০॥

এতদ্দ্বযোপদেশাঙ্গমাদৌ স্বীকার্যমিষ্যতে ।
ইত্যুক্ত্বাঽনন্তগরুডবিষ্বক্সেনপদোদকম্ ॥ ১১॥

আদৌ মাং প্রাশযন্নন্তে পরিশোষ্যেকৃতাংহসি ।

আত্মনো নামসাহস্রং সর্ষিচ্ছন্দোঽধিদৈবতম্ ॥ ১২॥

সন্যাসমুদ্রিকাভেদং মহ্যং সাঙ্গমুপাদিশত্ ।
যথাবত্তদিদং বৎস দদ্যাং তে শৃণু তত্ত্বতঃ ॥ ১৩॥

যৎপ্রাপ্যাত্যন্তিকী বৃত্ত্যা নিবৃত্ত্যা মোক্ষমেষ্যতি ।
হযাস্যনামসাহস্রস্তোত্ররাজস্য বৈভবম্ ॥ ১৪॥

ঋষিশ্শ্রীমান্ হযগ্রীবো বিদ্যামূর্তিস্স্বযং হরিঃ ।
দেবতা চ স এবাস্য ছন্দোনুষ্টুবিতি শ্রুতম্ ॥ ১৫॥

হংসো হংসোঽহমিত্যেতে বীজং শক্তিস্তুকীলকম্ ।
হংসীং হংসোঽহমিত্যেতে প্রাগ্জপ্যা মনবস্ত্রযঃ ॥ ১৬॥

এেকৈকস্য দশাবৃত্তিরিতিসঙ্খ্যাবিধীযতে ।
প্রণবত্রযমন্ত্রং স্যাৎকবচং শ্রীশ্শ্রিযো ভবেত্ ॥ ১৭॥

শ্রীবিভূষণ ইত্যেতদ্ধৃদযং পরিকীর্তিতম্ ।
পরোরজাঃ পরং ব্রহ্মেত্যপি যোনিরুদাহৃতা ॥ ১৮॥

বিদ্যামূর্তিরিতি ধ্যানং বিশ্বাত্মেতি চ গদ্যতে ।
বিশ্বমঙ্গলনাম্নোঽস্য বিনিযোগো যথারুচি ॥ ১৯॥

ভ্রূনেত্রাশ্রোত্রনাসাহন্বোষ্ঠতালূরদে ক্রমাত্ ।

ষোডশস্বরবিন্যাসো দক্ষিণারম্ভমিষ্যতে ॥ ২০॥

জিহ্বাতলেঽপি তন্মূলে স্বরাবন্ত্যৌ চ বিন্যসেত্ ।

তদা তালুদ্বযন্যাসসখাযোস্তু পরিত্যজেত্ ॥ ২১॥

অযং হি বিদ্যাকামানামাদ্যস্ত্বন্য ফলৈষিণাম্ ।

দোঃপৎসকথ্যঙ্গুলীশীর্ষে বর্গান্কচটতান্ন্যসেত্ ॥ ২২॥

পার্শ্বযোস্তু বফৌ পৃষ্টোদরযোস্তু বভৌ ন্যসেত্ ।

মকারং হৃদযে ন্যস্য জীবে বা পঞ্চবিংশকে ॥ ২৩॥

নাভিপাযূদরে গুহ্যে যরলবান্বিনিক্ষিপেত্ ।

শষৌ কুণ্ডলযোশ্শীর্ষং হারে চ কটিসূত্রকে ॥ ২৪॥

সহৌ হৃদব্জে হর্দে চ লমাপাদশিখে ন্যসেত্ ।

ক্ষঞ্চ শীর্ষাদি পাদান্তং মাতৃকান্যাস এষ তু ॥ ২৫॥

অস্য শ্রীহযগ্রীবসহস্রনাম স্তোত্রমহামন্ত্রস্য শ্রীহযগ্রীব ঋষিঃ ।

অনুষ্টুপ্ ছন্দঃ । শ্রীহযগ্রীব পরমাত্মা দেবতা । হংস ইতি বীজম্ ।

হংসোহমিতি শক্তিঃ । হংসাং হংসীমিতি কীলকম্ । ওঁ ওঁ ওমিত্যস্ত্রম্ ।

শ্রীঃ শ্রিযঃ ইতি কবচম্ । শ্রীবিভূষণ ইতি হৃদযম্ ।

পরোরজাঃ পরং ব্রহ্মেতি যোনিঃ । বিদ্যামূর্তির্বিশ্বাত্মা ইতি ধ্যানম্ ।

হংসামঙ্গুষ্ঠাভ্যাং নমঃ । হংসীং তর্জনীভ্যাং নমঃ ।

হংসূং মধ্যমাভ্যাং নমঃ । হংসোং অনামিকাভ্যাং নমঃ ।

হংসৌং কনিষ্ঠিকাভ্যাং নমঃ । হংসঃ করতলকরপৃষ্ঠাভ্যাং নমঃ ।

এবং হৃদযাদিন্যাসঃ ॥

হংসাং জ্ঞানায হৃদযায নমঃ । হংসীং ঐশ্বর্যায শিরসে স্বাহা ।

হংসূং শক্তযৈ শিখাযৈ বষট্ । হংসোং বলায কবচায হুং ।

হংসৌং তেজসে নেত্রাভ্যাং বৌষট্ ।

হংসঃ বীর্যাযাস্ত্রায ফট্ ওমিতি দিগ্বন্ধঃ ॥

অথ মাতৃকান্যাসঃ -

ওঁ অম্ আম্ ভ্রুবোঃ । ইম্ ঈম্ নেত্রযোঃ । উম্ ঊম্ শ্রোত্রযোঃ । ঋম্ ৠম্ নাসিকযোঃ ।

ঌম্ ৡম্ কপোলযোঃ । এম্ ঐম্ ওষ্ঠযোঃ । ওঁ ঔম্ দন্তপঙ্ক্ত্যোঃ ।

অম্ জিহ্বাতলে । অঃ জিহ্বামূলে ।

কবর্গং দক্ষিণে বাহুমূলে কূর্পরে মণিবন্ধে করতলে হস্তাগ্রে ।

চবর্গং বামে বাহুমূলে কূর্পরে মণিবন্ধে করতলে হস্তাগ্রে ।

টবর্গং দক্ষিণে পাদমূলে জানুনি পাদপার্শ্নৌ পাদতলে পাদাগ্রে ।

তবর্গং বামে পাদমূলে জানুনি পাদপার্শ্নৌ পাদতলে পাদাগ্রে ।

পফৌ পার্শ্বযোঃ । বভৌ পৃষ্ঠোদরযোঃ । মং হৃদি ।

যং রং লং বং নাভৌ পাযৌ উদরে গুহ্যে । শষৌ হস্তযোঃ ।

সহৌ শীর্ষে কট্যাম্ । লক্ষৌ হৃদব্জে হার্দে উতি মাতৃকান্যাসঃ ॥

অথ ধ্যানম্ ॥

বিদ্যামূর্তিমখণ্ডচন্দ্রবলযশ্বেতারবিন্দস্থিতং
হৃদ্যাভং স্ফটিকাদ্রিনির্মলতনুং বিদ্যোতমানংশ্রিযা।
বামাঙ্কস্থিতবল্লভাং প্রতি সদাব্যাখ্যান্তমাম্নাযবা-
গর্থানাদিমপূরুষং হযমুখং ধ্যাযামি হংসাত্মকম্ ॥ ১॥

বিশ্বাত্মা বিশদপ্রভাপ্রতিলসদ্বাগ্দেবতামণ্ডলো
দেবো দক্ষিণপাণিযুগ্মবিলসদ্বোধাঙ্কচক্রাযুধঃ।
বামোদগ্রকরে দরং তদিতরেণাশ্লিষ্য দোষ্ণা রমাং
হস্তাগ্রে ধৃতপুস্তকস্স দযতাং হংসো হিরণ্যচ্ছদঃ ॥ ২॥

অথ সহস্রনামস্তোত্রপ্রারম্ভঃ।
ওঁ - শ্রীং হংসো হ্মৈ মোং ক্লীং শ্রীশ্শ্রিযশ্শ্রীবিভূষণঃ।
পরোরজাঃ পরং ব্রহ্ম ভূর্ভুবস্সুবরাদিমঃ ॥ ১॥

ভাস্বান্ভগশ্চ ভগবাস্স্বস্তিস্বাহা নমস্স্বধা।
শ্রৌষড্বৌষঢলং হুং ফট্ হুং হ্রীং ক্রোং হ্লৌং যথা তথা ॥ ২॥

কর্কগ্রীবঃ কলানাথঃ কামদঃ করুণাকরঃ।
কমলাধ্যুষিতোৎসঙ্গঃ ক্ষযে কালীবশানুগঃ ॥ ৩॥

নিষচ্ছোপনিষচ্চাথ নীচৈরুচ্চৈস্সমং সহ ।

শশ্বদ্যুগপদস্থায শনৈরেকো বহুধ্রুবঃ ॥ ৪॥

ভূতভৃদ্ভূরিদস্সাক্ষী ভূতাদিঃ পুণ্যকীর্তনঃ ।

ভূমা ভূমিরধোন্নদ্ধঃ পুরুহূতঃ পুরুষ্টুতঃ ॥ ৫॥

প্রফুল্লপুণ্ডরীকাক্ষঃ পরমেষ্ঠী প্রভাবনঃ ।

প্রভুর্ভগঃসতাং বন্ধুর্ভযধ্বংসী ভবাপনঃ ॥ ৬॥

উদ্যন্নুরুশযাহ্বং কৃদুরুগায উরুক্রমঃ ।

উদারস্ত্রিযুগস্ত্র্যাত্মা নিদানং নলযো হরিঃ ॥ ৭॥

হিরণ্যগর্ভো হেমাঙ্গো হিরণ্যশ্মশ্রুরীশিতা ।

হিরণ্যকেশো হিমহা হেমবাসা হিতৈষণঃ ॥ ৮॥

আদিত্যমণ্ডলান্তস্থো মোদমানস্সমূহনঃ ।

সর্বাত্মা জগদাধারস্সন্নিধিস্সারবাস্স্বভূঃ ॥ ৯॥

গোপতির্গোহিতো গোমী কেশবঃ কিন্নরেশ্বরঃ ।

মাযী মাযাবিকৃতিকৃন্মহেশানো মহামহাঃ ॥ ১০॥

মমা মিমী মুমূ মৃমৄং ম্লূম্লূং মৈমৈং তথৈব চ ।

মোমৌং বিন্দুর্বিসর্গশ্চ হ্রস্বোদীর্ঘঃ প্লুতস্স্বরঃ ॥ ১১॥

উদাত্তশ্চানুদাত্তশ্চ স্বরিতঃ প্রচযস্তথা ।

কং খং গং ঘং ঙং চ চং ছং জং ঝং ঞং টং ঠমেব চ ॥ ১২॥

ডং ঢং ণং তং থং চ দং চ ধং নং পং ফং বমেব চ

ভং মং যং রং লং চ বং চ শং ষং সং হং ळमेব চ ॥ ১৩॥

ক্ষং যমোং ব্যঞ্জনো জিহ্বামূলীযোঽর্ধবিসর্গবান্ ।

উপধ্মানীয ইতি চ সংযুক্তাক্ষর এব চ ॥ ১৪॥

পদং ক্রিযা কারকশ্চ নিপাতো গতিরব্যযঃ ।

সন্নিধির্যোগ্যতাঽঽকাঙ্ক্ষা পরস্পরসমন্বযঃ ॥ ১৫॥

বাক্যং পদ্যং সম্প্রদাযো ভাবশ্শব্দার্থলালিতঃ ।

ব্যঞ্জনা লক্ষণা শক্তিঃ পাকো রীতিরলঙ্কৃতিঃ ॥ ১৬॥

শয্যা ক্রৌঢধ্বনিস্তদ্বৎকাব্যং সর্গঃ ক্রিযা রুচিঃ ।

নানারূপপ্রবন্ধশ্চ যশঃ পুণ্যং মহদ্ধনম্ ॥ ১৭॥

ব্যবহারপরিজ্ঞানং শিবেতরপরিক্ষযঃ ।

সদঃ পরমনির্বাণং প্রিযপথ্যোপদেশকঃ ॥ ১৮॥

সংস্কারঃ প্রতিভা শিক্ষা গ্রহণং ধারণং শ্রমঃ।

আসুতাস্বাদিমা চিত্রং বিস্তারশ্চিত্রসংবিধিঃ॥ ১৯॥

পুরাণমিতিহাসশ্চ স্মৃতিসূত্রং চ সংহিতা।

আচার আত্মনা তুষ্টিরাচার্যাজ্ঞানতিক্রমঃ॥ ২০॥

শ্রীমান্শ্রীগীঃশ্রিয়ঃ কান্তশ্শ্রীনিধিশ্শ্রীনিকেতনঃ।

শ্রেযান্হযাননশ্রীদশ্শ্রীমযশ্শ্রিতবৎসলঃ॥ ২১॥

হংসশ্শুচিষদাদিত্যো বসুশ্চন্দ্রোঽন্তরিক্ষসত্।

হোতা চ বেদিষদ্যোনিরতিথির্দ্রোণসদ্ধবিঃ॥ ২২॥

নৃষন্মৃত্যুশ্চ বরসদমৃতং চর্তসদ্বৃষঃ।

ব্যোমসদ্বিবিধস্ফোটশব্দার্থব্যঙ্গ্যবৈভবঃ॥ ২৩॥

অব্জা রসস্বাদুতমো গোজা গেযো মনোহরঃ।

ঋতজাস্সকলং ভদ্রমদ্রিজাশ্বৈর্যমুত্তমম্॥ ২৪॥

ঋতং সমজ্ঞাত্বনৃতং বৃহৎসূক্ষ্মবশানুগঃ।

সত্যং জ্ঞানমনন্তং যত্তৎসদ্ব্রহ্মমযোঽচ্যুতঃ॥ ২৫॥

অগ্রেভবন্নগো নিত্যঃ পরমঃ পুরুষোত্তমঃ।

যোগনিদ্রাপরস্স্বামী নিধ্যানবরনির্বৃনঃ ॥ ২৬॥

রসো রস্যো রসযিতা রসবান্ রসিকপ্রিযঃ ।

আনন্দো নন্দযন্সর্বানানন্দী হযকন্ধরঃ ॥ ২৭॥

কালঃ কাল্যশ্চ কালাত্মা কালাভ্যুত্থিতজাগরঃ ।

কলাসাচিব্যকৃৎকান্তাকথিতব্যাধিকার্যকঃ ॥ ২৮॥

দৃঙ্ন্যঞ্চনোদঞ্চনোদ্যল্লযসর্গো লঘুক্রিযঃ ।

বিদ্যাসহাযো বাগীশো মাতৃকামণ্ডলীকৃতঃ ॥ ২৯॥

হিরণ্যং হংসমিথুনমীশানশ্শক্তিমান্ জযী ।

গ্রহমেথী গুণী শ্রীভূনীলালীলৈকলালস ॥ ৩০॥

অঙ্কেনোদূহ্য বাগ্দেবীমাচার্যকমুপাশ্রযঃ ।

বেদবেদান্তশাস্ত্রার্থতত্ত্বব্যাখ্যানতৎপরঃ ॥ ৩১॥

ল্হৌং হ্লং হং হং হযো হং সৃং হংসাং হংসীং হসৃং হসৌম্ ।

হসৃং হং হরিণো হারী হরিকেশো হরেড়িতঃ ॥ ৩২॥

সনাতনো নির্বীজস্সন্নব্যক্তো হৃদযেশযঃ ।

অক্ষরঃ ক্ষরজীবেশঃ ক্ষমী ক্ষযকরোঽচ্যুতঃ ॥ ৩৩॥

কর্তাকারয়িতাঽকার্যং কারণং প্রকৃতিঃ কৃতিঃ ।

ক্ষয়ক্ষয়মনামার্থো বিষ্ণুর্জিষ্ণুর্জগন্ময়ঃ ॥ ৩৪॥

সঙ্কুচন্বিকচস্স্থাণুর্নির্বিকারো নিরাময়ঃ ।

শুদ্ধো বুদ্ধঃ প্রবুদ্ধশ্চ স্নিগ্ধো মুগ্ধস্সমুদ্ধতঃ ॥ ৩৫॥

সঙ্কল্পদো বহুভবৎসর্বাত্মা সর্বনামভৃত্ ।

সহস্রশীর্ষস্সর্বজ্ঞস্সহস্রাক্ষস্সহস্রপাত্ ॥ ৩৬॥

ব্যক্তোবিরাট্স্বরাট্সম্রাড্বিষ্বগ্রূপবপুর্বিধুঃ ।

মায়াবী পরমানন্দো মান্যো মায়াতিগো মহান্ ॥ ৩৭॥

বটপত্রশয়ো বালো ললন্নাম্নায়সূচকঃ ।

মুখন্যস্তকরগ্রস্তপাদাগ্রপটলঃ প্রভুঃ ॥ ৩৮॥

নৈদ্রীহাসাশ্বসম্ভূতজ্ঞাজ্ঞসাত্বিকতামসঃ ।

মহার্ণবাম্বুপর্যঙ্কঃ পদ্মনাভঃ পরাৎপরঃ ॥ ৩৯॥

ব্রহ্মভূর্ব্রহ্মভয়হৃদ্ধরিরোমুপদেশকৃত্ ।

মধুকৈটভনির্মাতা মত্তব্রহ্মমদাপহঃ ॥ ৪০॥

বেধোবিলাসবাগানির্দয়াসারো মৃষার্থদঃ ।

নারায়ণাস্ত্রনির্মাতামধুকৈটভমর্দনঃ ॥ ৪১॥

বেদকর্তা বেদভর্তা বেদহর্তা বিদাংবরঃ ।

পুঙ্খানুপুঙ্খহেষাঢ্যঃ পূর্ণষাড্গুণ্যবিগ্রহঃ ॥ ৪২॥

লালামৃতকণব্যাজবান্তনির্দোষবর্ণকঃ ।

উল্লোলস্বানধীরোদ্যদুচ্চৈর্হলহলধ্বনিঃ ॥ ৪৩॥

কর্ণাদারভ্য কল্ক্যাত্মা কবিঃ ক্ষীরার্ণবোপমঃ ।

শঙ্খ চক্রগদী খড্গী শার্ঙ্গী নির্ভযমুদ্রকঃ ॥ ৪৪॥

চিন্মুদ্রাচিহ্নিতো হস্ততলবিন্যস্তপুস্তকঃ ।

বিদ্যানাম্নীং শ্রিযং শিষ্যাং বেদযন্নিজবৈভবম্ ॥ ৪৫॥

অষ্টার্ণ্যম্যোঽষ্টভুজোব্যষ্টিসৃষ্টিকরঃ পিতা ।

অষ্টৈশ্বর্যপ্রদোহ্যষ্যদষ্টমূর্তিপিতৃস্তুতঃ ॥ ৪৬॥

অনীতবেদপুরুষো বিধিবেদোপদেশকৃত্ ।

বেদবেদাঙ্গবেদান্তপুরাণস্মৃতিমূর্তিমান্ ॥ ৪৭॥

সর্বকর্মসমারাধ্যস্সর্ববেদমযো বিভুঃ ।

সর্বার্থতত্ত্বব্যাখ্যাতা চতুষ্ষষ্টিকলাধিপঃ ॥ ৪৮॥

শুভযুক্সুমুখশ্শুদ্ধস্সুরূপস্সুগতস্সুধীঃ ।

সুব্রতিস্সংহৃতিশ্শূরস্সুতপাঃ সুষ্টুতিস্সুহৃত্ ॥ ৪৯॥

সুন্দরস্সুভগস্সৌম্যস্সুখদস্সুহৃদাং প্রিয়ঃ ।

সুচরিত্রস্সুখতরশ্শুদ্ধসত্ত্বপ্রদায়কঃ ॥ ৫০॥

রজস্তমোহরো বীরোবিশ্বরক্ষাধুরন্ধরঃ ।

নরনারায়ণাকৃত্যা গুরুশিষ্যত্বমাস্থিতঃ ॥ ৫১॥

পরাবরাত্মা প্রবলঃ পাবনঃ পাপনাশনঃ ।

দয়াঘনঃ ক্ষমাসারো বাৎসল্যৈকবিভূষণঃ ॥ ৫২॥

আদিকূর্মো জগদ্ভর্তা মহাপোত্রী মহীধরঃ ।

স্তব্ধিৎস্বামী হরির্যক্ষো হিরণ্যরিপুরৈচ্ছিকঃ ॥ ৫৩॥

প্রহ্লাদপালকস্সর্বভয়হর্তা প্রিয়ংবদঃ ।

শ্রীমুখালোকনস্রংসৎক্রৌঞ্চকঃ কুহকাঞ্চনঃ ॥ ৫৪॥

ছত্রী কমণ্ডলুধরো বামনো বদতাং বরঃ ।

পিশুনাত্মা শনোদৃষ্টিলোপনো বলিমর্দনঃ ॥ ৫৫॥

উরুক্তমো বলিশিরোন্যস্তাঙ্ঘ্রির্বলিমর্দনঃ ।

জামদগ্ন্যঃ পরশুভৃৎকৃত্তক্ষত্রকুলোত্তমঃ ॥ ৫৬॥

রামোঽভিরামশ্শান্তাত্মা হরকোদণ্ডখণ্ডনঃ ।
শরণাগতসন্ত্রাতা সর্বাযোধ্যকমুক্তিদঃ ॥ ৫৭॥

সঙ্কর্ষণোমদোদগ্রো বলবান্মুসলাযুধঃ ।
কৃষ্ণাক্লেশহরঃ কৃষ্ণো মহাব্যসনশান্তিদঃ ॥ ৫৮॥

অঙ্গারিতোত্তরাগর্ভপ্রাণদঃ পার্থসারথিঃ ।
গীতাচার্যো ধরাভারহারী ষট্পুরমর্দনঃ ॥ ৫৯॥

কল্কী বিষ্ণুযশস্সূনুঃ কলিকালুষ্যনাশনঃ ।
সাধুদুষ্কৃৎপরিত্রাণবিনাশবিহিতোদযঃ ॥ ৬০॥

বৈকুণ্ঠে পরমে তিষ্ঠন্ সুকুমারযুবাকৃতিঃ ।
বিশ্বোদযস্থিতিধ্বংসসঙ্কল্পেন স্বযং প্রভুঃ ॥ ৬১॥

মদনানাং চ মদনো মণিকোটীরমানিতঃ ।
মন্দারমালিকাপীডো মণিকুণ্ডলমণ্ডিতঃ ॥ ৬২॥

সুস্নিগ্ধনীলকুটিলকুন্তলঃ কোমলাকৃতিঃ ।
সুললাটস্তুতিলকস্সুভ্রূকস্সুকপোলকঃ ॥ ৬৩॥

সিদ্ধাসদসদালোকসুধাস্যন্দীরদচ্ছদঃ ।

তারকাকোরকাকারবিনির্মিতরদচ্ছদঃ ॥ ৬৪॥

সুধাবর্তিপরিস্ফূর্তিশোভমানরদচ্ছদঃ ।

বিষ্টব্ধোবিপুলগ্রীবোনিভৃতোচ্চৈশ্শ্রবস্থিতিঃ ॥ ৬৫॥

সমাবৃত্তাবদাতোরুমুক্তাপ্রালম্বভূষণঃ ।

রত্নাঙ্গদী বজ্রনিষ্কী নীলরত্নাঙ্ককঙ্কণঃ ॥ ৬৬॥

হরিন্মণিগণাবদ্ধশৃঙ্খলাকঙ্কণোর্মিকঃ ।

সিতোপবীতসংশ্লিষ্যৎপদ্মাক্ষমণিমালিকঃ ॥ ৬৭॥

শ্রীচূর্ণবদ্ধাদশোর্ধ্বপুণ্ড্ররেখাপরিষ্কৃতঃ ।

পট্টতন্তুগ্রথনবৎপবিত্রনরশোভিতঃ ॥ ৬৮॥

পীনবক্ষামহাস্কন্ধো বিপুলোরুকটীতটঃ ।

কৌস্তুভী বনমালী চ কান্ত্যাচন্দ্রাযুতোপমঃ ॥ ৬৯॥

মন্দারমালিকামোদী মঞ্জুবাগমলচ্ছবিঃ ।

দিব্যগন্ধো দিব্যরসো দিব্যতেজা দিবস্পতিঃ ॥ ৭০॥

বাচালো বাক্পতির্বক্তা ব্যাখ্যাতা বাদিনাং প্রিয়ঃ ।

ভক্তহৃন্মধুরো বাদিদিজিহ্বাভদ্রাননস্থিতিঃ ॥ ৭১॥

স্মৃতিসন্নিহিতস্স্নিগ্ধস্সিদ্ধিদসিদ্ধিসন্নুতঃ ।
মূলকন্দোমুকুন্দোগ্নৌস্স্বযম্ভূশম্ভুরৈন্দবঃ ॥ ৭২॥

ইষ্টো মনুর্যমঃ কালকাল্যঃ কম্বুকলানিধিঃ ।
কল্যঃ কামযিতা ভীমঃ কাতর্যহরণঃ কৃতিঃ ॥ ৭৩॥

সম্প্রিযঃ পক্কণস্তর্কচর্চানির্ধারণাদযঃ ।
ব্যতিরেকো বিবেকশ্চ প্রবেকঃ প্রক্রমঃ ক্রমঃ ॥ ৭৪॥

প্রমাণ প্রতিভূঃ প্রাজ্ঞঃ প্রজ্ঞাপথ্যাচধারণঃ ।
বিধির্বিধাতা ব্যবধিরুদ্ভবঃ প্রভবস্থিতিঃ ॥ ৭৫॥

বিষযস্সংশযঃ পূর্বঃ পক্ষঃ কক্ষ্যোপপাদকঃ ।
রাদ্ধান্তো বিহিতো ন্যাযফলনিষ্পত্তিরুদ্ভবঃ ॥ ৭৬॥

নানারূপাণি তন্ত্রাণি ব্যবহার্যো ব্যবস্থিতিঃ ।
সর্বসাধারণো দেবস্সাধ্বসাধুহিতে রতঃ ॥ ৭৭॥

সন্ধা সনাতনো ধর্মো ধর্মৈরর্চ্যো মহাত্মভিঃ ।
ছন্দোমযস্ত্রিধামাত্মা স্বচ্ছন্দশ্ছান্দসেডিতঃ ॥ ৭৮॥

যজ্ঞো যজ্ঞাত্মকো যষ্টা যজ্ঞাঙ্গোঽপঘনোহবিঃ ।

সমিদাজ্যং পুরোডাশশ্শালা স্থালী স্রুবস্স্রুচা ॥ ৭৯॥

প্রাগ্বংশো দেবযজনঃ পরিধিশ্চ পরিস্তরঃ ।

বেদির্বিহরণং ত্রেতা পশুঃ পাশশ্চ সংস্কৃতিঃ ॥ ৮০॥

বিধির্মন্ত্রোঽর্থবাদশ্চ দ্রব্যমঙ্গং চ দৈবতম্ ।

স্তোত্রং শস্ত্রং সাম গীতিরুদ্গীথস্সর্বসাধনম্ ॥ ৮১॥

যাজ্যা পুরোনুকাব্যা চ সামিধেনী সমূহনম্ ।

প্রযোক্তারঃ প্রযোগশ্চ প্রপঞ্চঃ প্রাশুভা শ্রমঃ ॥ ৮২॥

শ্রদ্ধা প্রধ্বংসনা তুষ্টিঃ পুষ্টিঃ পুণ্যং প্রতির্ভবঃ ।

সদস্সদস্যসম্পাতঃ প্রশ্নঃ প্রতিবচস্স্থিতিঃ ॥ ৮৩॥

প্রায়শ্চিত্তং পরিষ্কারো ধৃতির্নির্বহণং ফলম্ ।

নিযোগো ভাবনা ভাব্যং হিরণ্যং দক্ষিণা নুতিঃ ॥ ৮৪॥

আশীরভ্যুপপত্তিশ্চ তৃপ্তিস্স্বং শর্ম কেবলম ।

পুণ্যক্ষয়ঃ পুনঃ পাতভযং শিক্ষাশুগর্দনঃ ॥ ৮৫॥

কার্পণ্যং যাতনাং চিন্তা নির্বেদশ্চ বিহস্ততা ।

দেহভৃৎকর্মসম্পাতঃ কিঞ্চিৎকর্মানুকূলকঃ ॥ ৮৬॥

অহেতুকতযা প্রেম সাম্মুখ্যং চাপ্যনুগ্রহঃ ।
শুচিশ্শ্রীমৎকুলজনো নেতা সত্ত্বাভিমানবান্ ॥ ৮৭॥

অন্তরাযহরঃ পিত্রোরদুষ্টাহারদাযকঃ ।
শুদ্ধাহারানুরূপাঙ্গপরিণামবিধাযকঃ ॥ ৮৮॥

স্রাবপাতাদিবিপদাং পরিহর্তা পরাযণঃ ।
শিরঃপাণ্যাদিসন্ধাতা ক্ষেমকৃৎপ্রাণদঃ প্রভু ॥ ৮৯॥

অনির্ঘৃণশ্চাবিষমশ্শক্তিত্রিতযদাযকঃ ।
স্বেচ্ছাপ্রসঙ্গসম্পত্তিব্যাজহর্ষবিশেষবান্ ॥ ৯০॥

সংবিৎসন্ধাযকস্সর্বজন্মক্লেশস্মৃতিপ্রদঃ ।
বিবকেশোকবৈরাগ্যভবভীতিবিধাযকঃ ॥ ৯১॥

গর্ভস্যাপ্যনুকূলাদিনাসান্তাধ্যবসাযদঃ ।
শুভবৈজননোপেতসদনেহোজনিপ্রদঃ ॥ ৯২॥

উত্তমাযুঃপ্রদো ব্রহ্মনিষ্ঠানুগ্রহকারকঃ ।
স্বদাসজননিস্তীর্ণতদ্বংশজপরম্পরঃ ॥ ৯৩॥

শ্রীবৈষ্ণবোৎপাদকৃতস্বস্তিকাবনিমণ্ডলঃ ।

অধর্বর্ণোক্তৈকশতমৃত্যুদূরক্রিয়াপরঃ ॥ ৯৪ ॥

দযাদ্যষ্টগুণাধাতা তত্তৎসংস্কৃতিসাধকঃ ।

মেধাবিধাতা শ্রদ্ধাকৃত্ সৌস্থ্যদো জামিতাহরঃ ॥ ৯৫ ॥

বিঘ্ননুদ্বিজযী ধাতা দেশকালানুকূল্যকৃত্ ।

বিনেতা সৎপথানেতা দোষহৃচ্ছুভদস্সখা ॥ ৯৬ ॥

হ্রীদো ভীদো রুচিকরো বিশ্বো বিশ্বহিতে রতঃ ।

প্রমাদহৃৎপ্রাপ্তকারী প্রদ্যুম্নো বলবত্তরঃ ॥ ৯৭ ॥

সাঙ্গবেদসমাযোক্তা সর্বশাস্ত্রার্থবিত্তিদঃ ।

ব্রহ্মচর্যান্তরাযঘ্নঃ প্রিযকৃদ্ধিতকৃৎপরঃ ॥ ৯৮ ॥

চিত্তশুদ্ধিপ্রদশ্ছিন্নাক্ষচাপল্যঃ ক্ষমাবহঃ ।

ইন্দ্রিযার্থারতিচ্ছেত্তা বিদ্যৈকব্যসনাবহঃ ॥ ৯৯ ॥

আত্মানুকূল্যরুচিকৃদখিলার্তিবিনাশকঃ ।

তিতীর্ষুহৃত্ত্বরাবেদী গুরুসদ্ভক্তিতেজসঃ ॥ ১০০ ॥

গুরুসম্বন্ধঘটকো গুরুবিশ্বাসবর্ধনঃ ।

গুরূপাসনসন্ধাতা গুরুপ্রেমপ্রবর্ধনঃ ॥ ১০১॥

আচার্যাভিমতৈর্যোক্তা পঞ্চসংস্কৃতিভাবনঃ ।
গুরূক্তবৃত্তিনৈশ্চল্যসন্ধাতাঽবহিতস্থিতিঃ ॥ ১০২॥

আপন্নাখিলরক্ষার্থমাচার্যকমুপাশ্রিতঃ ।
শাস্ত্রপাণিপ্রদানেন ভবমগ্নাঙ্সমুদ্ধরন্ ॥ ১০৩॥

পাঞ্চকালিকধর্মেষু নৈশ্চল্যং প্রতিপাদযন্ ।
স্বদাসারাধনাদ্যর্থশুদ্ধদ্রব্যপ্রদাযকঃ ॥ ১০৪॥

ন্যাসবিদ্যাবিনির্বোঢা ন্যস্তাত্মভররক্ষকঃ ।
স্বকৈঙ্কর্যৈকরুচিদস্স্বদাস্যপ্রেমবর্ধনঃ ॥ ১০৫॥

আচার্যার্থাখিলদ্রব্যসম্ভৃত্যর্পণরোচকঃ ।
আচার্যস্য স্বসচ্ছিষ্যোজ্জীবনৈকরুচিপ্রদঃ ॥ ১০৬॥

আগত্যযোজযনাসহিতৈককৃতিজাগরঃ ।
ব্রহ্মবিদ্যাসমাস্বাদসুহিতঃ কৃতিসংস্কৃতিঃ ॥ ১০৭॥

সৎকারে বিষধীদাতা তরুণ্যাং শববুদ্ধিদঃ ।
সভাম্প্রত্যাযযন্ব্যালীং সর্বত্র সমবুদ্ধিদঃ ॥ ১০৮॥

সম্ভাবিতাশেষদোষহৃৎপুনর্ন্যাসরোচকঃ ।

মহাবিশ্বাসসন্ধাতা স্থৈর্যদাতা মদাপহঃ ॥ ১০৯॥

নাদব্যাখ্যাস্বসিদ্ধান্তরক্ষাহেতুস্বমন্ত্রদঃ ।

স্বমন্ত্রজপসংসিদ্ধিজঙ্ঘালকবিতোদযঃ ॥ ১১০॥

অদুষ্টগুণবৎকাব্যবন্ধব্যামুগ্ধচেতনঃ ।

ব্যঙ্গ্যপ্রধানরসবদ্গদ্যপদ্যাদিনির্মিতিঃ ॥ ১১১॥

স্বভক্তস্তুতিসন্তুষ্টো ভূযোভক্তিপ্রদাযকঃ ।

সাত্ত্বিকত্যাগসম্পন্নসৎকর্মকৃদতিপ্রিযঃ ॥ ১১২॥

নিরন্তরানুস্মরণনিজদাসৈবাদাস্যকৃত্ ।

নিষ্কামবৎসলো নৈচ্যভাবনেষু বিনির্বিশন্ ॥ ১১৩॥

সর্বভূতভবদ্ভাবং সম্পশ্যৎসুসদাস্থিতঃ ।

করণত্রযসারূপ্যকল্যাণপতিসাদরঃ ॥ ১১৪॥

কদা কদেতি কৈঙ্কর্যকামিনাং শেষিতাস্তজন ।

পরব্যূহাদিনির্দোষশুভাশ্রযপরিগ্রহঃ ॥ ১১৫॥

চন্দ্রমণ্ডলমধ্যস্য শ্বেতাম্ভোরুহবিষ্টরঃ ।

জ্যোৎস্নায়মানাঙ্গরুচিনির্ধূতান্তর্বহিস্তমাঃ ॥ ১১৬॥

ভাব্যো ভাবয়িতা ভদ্রং পারিজাতবনালয়ঃ ।

ক্ষীরাব্ধিমধ্যমদ্বীপপালকঃ প্রপিতামহঃ ॥ ১১৭॥

নিরন্তরনমোবাকশুদ্ধয়াজিহৃদাশ্রয়ঃ ।

মুক্তিদশ্বেতমৃদ্রূপশ্বেতদ্বীপবিভাবনঃ ॥ ১১৮॥

গরুডাহারিতশ্বেতমৃৎপূতযদুভূধরঃ ।

ভদ্রাশ্ববর্ষনিলয়ো ভয়হারী শুভাশ্রয়ঃ ॥ ১১৯॥

ভদ্রশ্রীবৎসহারাঢ্যঃ পঞ্চরাত্রপ্রবর্তকঃ ।

ভক্তাত্মভাবভবনো হার্দোঽঙ্গুষ্ঠপ্রমাণবান্ ॥ ১২০॥

স্বদাসসৎকৃতাকৃত্যে তন্মিত্রারিষু যোজয়ন্ ।

প্রাণানুৎক্রাময়ন্নূরীকৃতপ্রারব্ধলোপনঃ ॥ ১২১॥

লব্ধ্বৈব শিক্ষয়াপাপমশেষমপি নির্ণুদন্ ।

ত্রিস্থূণক্ষোভতো ভূতসূক্ষ্মেভ্যস্সূক্ষ্মবপুস্সৃজন্ ॥ ১২২॥

নিরঙ্কুশকৃপাপূরো নিত্যকল্যাণকারকঃ ।

মূর্ধন্যনাড্যা স্বান্দাসান্ব্রহ্মরন্ধ্রাদুদঞ্চয়ন্ ॥ ১২৩॥

উপাসনপরান্সর্বান্ প্রারব্ধমনুভাবযন্ ।
সর্বপ্রারব্ধদেহান্তেঽপ্যন্তিমস্মরণং দিশন্ ॥ ১২৪॥

প্রপেযুষাং ভেজুষাং চ যমদৃষ্টিমভাবযন্ ।
দিব্যদেহপ্রদস্সূর্যং দ্বারযন্মোক্ষমেযুষাম্ ॥ ১২৫॥

আতিবাহিকসৎকারানধ্বন্যাপাদ্য মানযন্ ।
সার্বান্ক্রতুভুজশ্শশ্বৎপ্রাভৃতানি প্রদাপযন্ ॥ ১২৬॥

দুরন্তমাযাকান্তারং দ্রুতং যোগেন্ লঙ্ঘযন্ ।
স্ফাযৎসুদর্শিবিবিধবীথ্যন্তেনাধ্বনা নযন্ ॥ ১২৭॥

সীমান্তসিন্ধুবিরজাং যোগেনোত্তারযন্বশী ।
অমানবস্য দেবস্য করং শিরসি ধারযন্ ॥ ১২৮॥

অনাদিবাসনাং ধূন্বন্ বৈকুণ্ঠাপ্ত্যা সলোকযন্ ।
অহেযমঙ্গলোদারতনুদানাৎসরূপযন ॥ ১২৯॥

সূরিজুষ্টং সুখৈকান্তং পরমং পদমাপযন্ ।
অরারণ্যামৃতাম্ভোধী দর্শযন্ শ্রমনাশনঃ ॥ ১৩০॥

দিব্যোদ্যানসরোবাপীসরিন্মণিনগান্নযন ।

ঐরম্মদামৃতসরোগমযন্সূপবৃংহণঃ ॥ ১৩১॥

অশ্বত্থং সোমসবনং প্রাপযন্বিষ্টরশ্রবাঃ ।

দিব্যাপ্সরস্সমানীতব্রহ্মালঙ্কারদাযকঃ ॥ ১৩২ ॥

দিব্যবাসোঽঞ্জনক্ষৌমমাল্যৈস্স্বান্বহুমানযন্ ।

স্বীযামযোধ্যাং নগরীং সাদরং সম্প্রবেশযন্ ॥ ১৩৩॥

দাসান্দিব্যরসালোকগন্ধাংসলশরীরযন্ ।

স্বদাসান্সূরিবর্গেণ সস্নেহং বহুমানযন্ ॥ ১৩৪ ॥

সূরিসেবোদিতানন্দনৈচ্যাস্স্বানতিশাযযন্ ।

বাচযন্স্বাং নমোবীপ্সাং কুর্বন্প্রহ্বান্কৃতাঞ্জলীন্ ॥ ১৩৫॥

প্রাকারগোপুরারামপ্রাসাদেভ্যঃ প্রণামযন্ ।

ইন্দ্রপ্রজাপতিদ্বারপালসম্মানমাপযন্ ॥ ১৩৬॥

মালিকাঞ্চন্মহারাজবীথীমধ্যং নিবাসযন্ ।

শ্রীবৈকুণ্ঠপুরন্ধ্রীভির্নানাসৎকারকারকঃ ॥ ১৩৭॥

দিব্যং বিমানং গমযন্ ব্রহ্মকান্ত্যাভিপূরযন্ ।

মহানন্দাত্মকশ্রীমন্মণিমণ্ডপমাপযন্ ॥ ১৩৮॥

হৃষ্যৎকুমুদচণ্ডাদ্যৈর্বিষ্বক্সেনান্তিকং নযন্ ।

সেনেশচোদিতাস্থাননাযকো হেতিনাযকঃ ॥ ১৩৯॥

প্রাপযন্দিব্যমাস্থানং বৈনতেযং প্রণামযন্ ।

শ্রীমৎসুন্দরসূরীন্দ্রদিব্যপঙ্ক্তিং প্রণামযন্ ॥ ১৪০॥

ভাস্বরাসনপর্যঙ্কপ্রাপণেন কৃতার্থযন্ ।

পর্যঙ্কবিদ্যাসংসিদ্ধসর্ববৈভবসঙ্গতঃ ॥ ১৪১॥

স্বাত্মানমেব শ্রীকান্তং সাদরং ভূরি দর্শযন্ ।

শেষতৈকরতিং শেষং শয্যাত্মানং প্রণামযন্ ॥ ১৪২॥

অনন্তাক্ষিদ্বিসাহস্রসাদরালোকপাত্রযন্ ।

অকুমারযুবাকারং শ্রীকান্তং সম্প্রণামযন্ ॥ ১৪৩॥

অতটানন্দতো হেতো রঞ্জযন্কিলিকিঞ্চিতম্ ।

দাসানত্যুত্থিতমুহুঃকৃতিসৃষ্টিপ্রসন্নহৃত্ ॥ ১৪৪॥

শ্রীযাং প্রাপস্বযং তাতং জীবং পুত্রং প্রহর্ষযন্ ।

মজ্জযন্ স্বমুখাম্ভোধৌ স্বকাং কীর্তিরুচিং দিশন্ ॥ ১৪৫॥

দযার্দ্রগঙ্গাবলনাকৃতহ্লাদৈঃ কৃতার্থযন্ ।

পর্যঙ্কারোহণপ্রহ্বং সমং লক্ষ্ম্যোপপাদযন্ ॥ ১৪৬॥

কস্ত্বমিত্যনুযুঞ্জানো দাসোঽস্মীত্যুক্তিবিস্মিতঃ ।
অপৃথক্ত্বপ্রকারোঽস্মি বাচাস্বাশ্রিতবদ্ভবন্ ॥ ১৪৭॥

বিদুষাং তৎক্রতুনযাদ্ধযাস্যবপুষাভবন্ ।
বাসুদেবাত্মনা ভূযো ভববৈকুণ্ঠনাযকঃ ॥ ১৪৮॥

যথা তথৈব স্বং রূপং জগন্মোহনমূর্তিমান্ ।
দ্বিমূর্তী বহুমূর্তীশ্চ আত্মনশ্চ প্রকাশযন্ ॥ ১৪৯॥

যুগপৎসকলং সাক্ষাৎস্বতঃ কর্তুং সমর্থযন্ ।
কবীনামাদিশন্নিত্যং মুক্তানামাদিমঃ কবিঃ ॥ ১৫০॥

ষডর্ণমনুনিষ্ঠানাং শ্বেতদ্বীপস্থিতিং দিশন্ ।
দ্বাদশাক্ষরনিষ্ঠানাং লোকং সান্তানিকং দিশন্ ॥ ১৫১॥

অষ্টাক্ষরৈকনিষ্ঠানাং কার্যং বৈকুণ্ঠমর্পযন্ ।
শরণাগতিনিষ্ঠানাং সাক্ষাদ্বৈকুণ্ঠমর্পযন্ ॥ ১৫২॥

স্বমন্ত্ররাজনিষ্ঠানাং স্বস্মার্দাত্তেশযং দিশন্ ।
শ্রিযা গাঢোপগূঢাত্মা ভূতধাত্রীরুচিং দিশন্ ॥ ১৫৩॥

নীলাবিভূতিব্যামুগ্ধো মহাশ্বেতাশ্বমস্তকঃ ।

ত্র্যক্ষস্ত্রিপুরসংহারী রুদ্রস্স্কন্দো বিনাযকঃ ॥ ১৫৪॥

অজো বিরিঞ্চো দ্রুহিণো ব্যাপ্তমূর্তিরমূর্তিকঃ ।

অসঙ্গোঽনন্যধীসঙ্গবিহঙ্গোবৈরিভঙ্গদঃ ॥ ১৫৫॥

স্বামী স্বং স্বেন সন্তুপ্যন্ শক্রস্সর্বাধিকস্যদঃ ।

স্বযংজ্যোতিস্স্বযংবৈদ্যশ্শূরশ্শূরকুলোদ্ভবঃ ॥ ১৫৬॥

বাসবো বসুরণ্যোগ্নির্বাসুদেবস্সুহৃদ্বসুঃ ।

ভূতো ভাবী ভবন্ভব্যো বিষ্ণুস্থানস্সনাতনঃ ॥ ১৫৭॥

নিত্যানুভাবো নেদীযান্দবীযান্দুর্বিভাবনঃ ।

সনৎকুমারস্সন্ধাতা সুগন্ধিস্সুখদর্শনঃ ॥ ১৫৮॥

তীর্থং তিতিক্ষুস্তীর্থাঙ্ঘ্রিস্তীর্থস্বাদুশ্শুভশ্শুচিঃ ।

তীর্থবদ্দীধিতিস্তিগ্মতেজাস্তীব্রমনামযঃ ॥ ১৫৯॥

ঈশাদ্যুপনিষদ্বেদ্যঃ পঞ্চোপনিষদাত্মকঃ ।

ঈডন্তঃস্থোঽপি দূরস্থঃ কল্যাণতমরূপবান্ ॥ ১৬০॥

প্রাণানাং প্রাণনঃ পূর্ণজ্ঞানৈরপি সুদুর্গ্রহঃ ।

নাচিকেতোপাসনার্চ্যস্ত্রিমাত্রপ্রণবোদিতঃ ॥ ১৬১॥

ভূতযোনিশ্চ সর্বজ্ঞোঽক্ষরোঽক্ষরপরাৎপরঃ ।

অকারাদিপদজ্ঞেযবৃ্যহতারার্থপূরুষঃ ॥ ১৬২॥

মনোমযামৃতো নন্দমযো দহররূপদৃত্ ।

ন্যাসবিদ্যাবেদ্যরূপঃ আদিত্যান্তর্হিরণ্মযঃ ॥ ১৬৩॥

ইদন্দ্র আত্মোদ্গীথাদি প্রতীকো পাসনান্বযী ।

মধুবিদ্যোপাসনীযো গাযত্রীধ্যানগোচরঃ ॥ ১৬৪॥

দিব্যকৌক্ষেযসজ্জ্যোতিঃ শাণ্ডিল্যোপাস্তিবীক্ষিতঃ ।

সংবর্গবিদ্যাবেদ্যাত্মা তত্ ষোডশকলং পরম্ ॥ ১৬৫॥

উপকোসলবিদ্যেক্ষ্যঃ পঞ্চাগ্ন্যাত্মশরীরকঃ ।

বৈশ্বানরঃ সদখেভূমা চ জগৎকর্মাঽঽদিপূরুষঃ ॥ ১৬৬॥

মূর্তামূর্তব্রহ্ম সর্বপ্রেষ্ঠোঽন্যপ্রিযতাকরঃ ।

সর্বান্তরশ্চাপরোক্ষশ্চান্তর্যাম্যমৃতোঽনঘঃ ॥ ১৬৭॥

অহর্নামাদিত্যরূপশ্চাহন্নামাক্ষিসংশ্রিতঃ ।

সতুর্যগাযত্র্যর্থশ্চ যথোপাস্ত্যাপ্যসদ্বপুঃ ॥ ১৬৮॥

চন্দ্রাদিসাযুজ্যপূর্বমোক্ষদন্যাসগোচরঃ ।
ন্যাসনাশ্যানভ্যুপেতপ্রারব্ধাংশো মহাদযঃ ॥ ১৬৯॥

অবতাররহস্যাদিজ্ঞানিপ্রারব্ধনাশনঃ ।
স্বেন স্বার্থং পরেণাপি কৃতে ন্যাসে ফলপ্রদঃ ॥ ১৭০॥

অসাহসোঽনপাযশ্রীস্সহাযস্স শ্রিযৈ বসন্ ।
শ্রীমান্নারাযণো বাসুদেবোঽব্যাদ্বিষ্ণুরুত্তমঃ ॥ ১৭১॥

॥ ॐ ॥
ইতীদং পরমং গুহ্যং সর্বপাপপ্রণাশনম্ ।
বাগীশনামসাহস্রং বৎস তেঽভিহিতং মযা ॥ ১॥

য ইদং শৃণুযাদ্ভক্ত্যা শ্রাবযেদ্বা স্বযং পঠেত্ ।
নাসৌ প্রাপ্নোতি দুরিতমিহামুত্র চ কিঞ্চন ॥ ২॥

তদিদং প্রজপন্ স্বামী বিদ্যাধীশো হযাননঃ ।
ক্ষত্রিযশ্চেন্মহারুদ্রো বিক্রমাক্রান্তসর্বভূঃ ॥ ৩॥

মহোদারো মহাকীর্তির্মহিতো বিজযী ভবেত্ ।
ঊরুজশ্চেদুরুযশোধনধান্যসমৃদ্ধিমান্ ॥ ৪॥

অশেষভোগসম্ভূতো ধনাধিপসমো ভবেত্ ।
শৃণুযাদেব বৃষলস্স্বযং বিপ্রাৎসুপূজিতাত্ ॥ ৫॥

মহিমানমবাপ্নোতি মহিতৈশ্বর্যভাজনম্ ।
শ্রীমতো হযশীর্ষস্য নাম্নাং সাহস্রমুত্তমম্ ॥ ৬॥

শৃণ্বন্পঠন্নপি নরস্সর্বান্কামানবাপ্নুযাত্ ।
ধর্মার্থকামসন্তানভাগ্যারোগ্যোত্তমাযুষাম্ ॥ ৭॥

প্রাপণে পরমো হেতুঃ স্তবরাজোঽযমদ্ভুতঃ ।
হযগ্রীবে পরা ভক্তিমুদ্বহন্ য ইমং পঠেত্ ॥ ৮॥

ত্রিসন্ধ্যং নিযতশ্শুদ্ধস্সোঽপবর্গায কল্পতে ।
ত্রিঃ পঠন্নামসাহস্রং প্রত্যহং বাগধীশিতুঃ ॥ ৯॥

মহতীং কীর্তিমাপ্নোতি নিস্সীমাং প্রেযসীং প্রিযাম্ ।
বীর্যং বলং পতিত্বং চ মেধাশ্রদ্ধাবলোন্নতীঃ ॥ ১০॥

সারস্বতসমৃদ্ধিং চ ভব্যান্ভোগ্যান্নতাস্সুতান্ ।

অভিরূপাং বধূং সাধ্বীং সুহৃদশ্চ হিতৈষিণঃ ॥ ১১॥

ব্রহ্মবিদ্যাপ্রবচনৈঃ কালক্ষেপং চ সন্ততম্ ।

হযগ্রীবপদাম্ভোজ সলিলস্যানুকূলতঃ ॥ ১২॥

লভেত নির্মলং শান্তো হংসোপাসনতৎপরঃ ।

শ্রীমৎপরমহংসস্য চিত্তোল্লাসনসন্নিধৌ ॥ ১৩॥

ইদং তু নাম্নাং সাহস্রমিষ্টসাধনমুত্তমম্ ।

পাপী পাপাদ্বিমুক্তস্স্যাদ্রোগী রোগাদ্বিমুচ্যতে ॥ ১৪॥

বদ্ধো বন্ধাদ্বিমুচ্যেত ভীতে ভীতির্বিমুচ্যতে ।

মুক্তো দরিদ্রো দারিদ্র্যাদ্ভবেৎপূর্ণমনোরথঃ ॥ ১৫॥

আপন্ন আপদা মুক্তো ভবত্যেব ন সংশযঃ ।

হংসার্চনপরো নিত্যং হংসার্চনপরাযণঃ ॥ ১৬॥

নির্ধূতকল্মষো নিত্যং ব্রহ্মসাযুজ্যমাপ্নুযাত্ ।

যে ভক্ত্যা পরমে হংসে শ্রিযা মিথুনিতাঙ্গিতে ॥ ১৭॥

জন্মব্যাধিজরানাশভযভাজো ন তে জনাঃ ।

আচার্যাত্তদিদং স্তোত্রমধিগত্য পঠেন্নরঃ ॥ ১৮॥

তস্যেদং কল্পতে সিদ্ধ্যৈ নান্যথা বৎস কাশ্যপ ।

আচার্যং লক্ষণৈর্যুক্তমন্যং বাঽঽত্মবিদুত্তমম্ ॥ ১৯॥

বৃত্বাচার্যং সদা ভক্ত্যা সিদ্ধ্যৈ তদিদমশ্নুযাত্ ।

স যাতি পরমাং বিদ্যাং শকুনিব্রহ্মহর্ষণীম্ ॥ ২০॥

হযাস্যনামসাহস্রস্তুতিরংহোবিনাশিনী ।

পরমো হংস এবাদৌ প্রণবং ব্রহ্মণে দিশত্ ॥ ২১॥

উপাদিশত্ততো বেদান্ শ্রীমান হযশিরো হরিঃ ।

তেনাসৌ স্তবরাজো হি হংসাখ্যহযগোচরঃ ॥ ২২॥

বিদ্যাসাম্রাজ্যসম্পত্তিমোক্ষৈকফলসাধনম্ ।

সর্ববিৎস্বাত্মভাবেন পরমং পদমাপ্নুযাত্ ॥ ২৩॥

ন তত্র সংশযঃ কশ্চিন্নিপুণং পরিপশ্যতি ।

তথাপি স্বাত্মনি প্রেমসিন্ধুসন্ধুক্ষণক্ষমঃ। ॥ ২৪॥

ইতীদং নামসাহস্রং সঙ্গৃহীতং তথোত্তরম্ ।

এবং সঙ্গৃহ্য দেবেন হযগ্রীবেণ পালনম্ ॥ ২৫॥

স্তোত্ররত্নমিদং দত্তং মহ্যং তত্ কথিতং তব ।

*Stotram Digitalized By* [*Sanskritdocuments.org*]

হংসনামসহস্রস্য বৈভবং পরমাদ্ভুতম্ ॥ ২৬॥

বক্তুং যথাবৎকশ্শক্তো বর্ষকোটিশতৈরপি ।

হযাস্যঃ পরমো হংসো হরির্নারাযণোঽব্যযঃ ॥ ২৭॥

কারণং শরণং মৃত্যুরমৃতং চাখিলাত্মনাম্ ।

সত্যং সত্যং পুনস্সত্যং ধ্যেযো নারাযণো হরিঃ ॥ ২৮॥

সমানমধিকং বেদান্ন দৈবং কেশবাৎপরম্ ।

তত্ত্বং বিজ্ঞাতুকামানাং প্রমাণৈস্সর্বতোমুখৈঃ ॥ ২৯॥

তত্ত্বং স পরমো হংস এক এব জনার্দনঃ ।

ইদং রহস্যং পরমং মহাপাতকনাশনম্ ॥ ৩০॥

ন চাশুশ্রূষবে বাচ্যং নাভক্তায কদাচন ।

নাপ্যন্যদেবতাযাপি ন বাচ্যং নাস্তিকায চ ॥ ৩১॥

অধীত্যৈতদ্গুরুমুখাদন্বহং যঃ পঠেন্নরঃ ।

তদ্বংশ্যা অপি সর্বে স্যুস্সম্পৎসারস্বতোন্নতাঃ ॥ ৩২॥

ইতি হযবদনাননারবিন্দান্মধুলহরীব নিরর্গলা গলন্তী ।

জগতি দশশতীতদীযনাম্নাং জযতি জডানপি গীর্ষু যোজযন্তী ॥ ৩৩॥

॥ ইতি শ্রীহযগ্রীবসহস্রনামস্তোত্রং সম্পূর্ণম্ ॥

Proofread by DPD, NA

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Hayagriva Sahasranama Stotram Lyrics in Bengali PDF
% File name : hayagrIvasahasranAmastotra.itx
% Category : sahasranAma
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : DPD, NA
% Source : Stotraratnakaram I, Madras 1927, p 305-327
% Latest update : November 6, 2015
% Send corrections to : sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 10, 2015 ] at Stotram Website